## गणपति अथर्वशीर्षं

ॐ भ॒द्रं कर्णे॑भिः शृणु॒याम॑ देवाः । भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः । स्थि॒रैरङ्गै॑स्तुष्टु॒वाꣳ स॑स्त॒नूभिः॑ । व्यशे॑म दे॒वहि॑तं॒ यदायुः॑ । स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः । स्व॒स्ति नः॑ पू॒षा वि॒श्ववे॑दाः । स्व॒स्ति न॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः । स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ॥

ॐ शान्ति॒ः शान्ति॒ः शान्तिः॑ ॥

ॐ लं नम॑स्ते गणप॒तये । त्वमे॒व प्र॒त्यक्षं॒ तत्त्व॑मसि । त्वमे॒व के॒वलं॒ कर्ता॑सि । त्वमे॒व के॒वलं॒ हर्ता॑सि । त्वमे॒व के॒वलं॒ धर्ता॑सि । त्वमेव सर्वं खल्विदं॑ ब्रह्मा॒सि । त्वं साक्षादात्मा॑सि नि॒त्यं । ऋ॑तं व॒च्मि । स॑त्यं व॒च्मि ॥२॥

अव॑ त्वं॒ माम् । अव॑ व॒क्तारम्॑ । अव॑ श्रो॒तारम्॑ । अव॑ दा॒तारम्॑ । अव॑ धा॒तारम्॑ । अवा॑नूचानमव शि॒ष्यम् । अव॑ पु॒रस्तात् । अव॑ दक्षिणा॒त्तात् । अव॑ पश्चा॒त्तात् । अव॑ चोत्तरा॒तात् । अव॑ चोर्ध्वा॒त्तात् । अवा॑धरा॒त्तात् । सर्वतो मां पाहि पाहि॑ सम॒न्तात् ॥३॥

त्वंवाङ्मयस्त्वं चिन्म॒यः । त्वमानन्दमयस्त्व॑ं ब्रह्मम॒यः । त्वं सच्चिदानन्दाऽद्वि॑तीयो॒सि । त्वं प्रत्यक्ष॑ं ब्रह्मा॒सि । त्वं ज्ञानमयो विज्ञा॑नमयो॒सि ॥४॥

सर्वं जगदिदं त्वत्तो॑ जाय॒ते । सर्वं जगदिदं त्वत्त॑स्तिष्ठ॒ति । सर्वं जगदिदं त्वयि लय॑मेष्य॒ति । सर्वं जगदिदं त्वयि॑ प्रत्ये॒ति । त्वं भूमिरापोनलोनि॑लो न॒भः । त्वं चत्वारि वा॑क्पदा॒नि ॥५॥

त्वं गुणत्र॑याती॒तः । त्वं देहत्र॑याती॒तः । त्वं कालत्र॑ती॒तः । त्वं मूलाधारस्थितो॑सि नि॒त्यम् । त्वं शक्तित्र॑यात्म॒कः । त्वां योगिनो ध्याय॑ति नि॒त्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म॒ भूर्भु॑वस्सु॒वरोम् ॥६॥

ग॒णा॒दिं॒ पूर्व॑मु॒च्चा॒र्य॒ व॒र्णा॒दिंस्त॑दन॒न्तरम् । अनु॑स्वारः परत॒रः । अर्धे॑न्दुलसि॑तं त॒था । तारे॑ण यु॒क्तम् । एतत्तव मन॑स्स्वरू॒पम् । गकारः पूं॑वरू॒पम् । अकारो मध्य॑मरू॒पम् । अनु॑स्वारश्चां॑न्त्यरू॒पम् । बिन्दुरुत्त॑र रू॒पं । नाद॑स्सन्धा॒नम् । संहि॑ता स॒न्धिः । सैषा गणे॑श वि॒द्या । गण॑क ऋ॒षिः । निचृ॑द्गायत्रीच्छ॒न्दः । श्री महागणपति॑र्दे॒वता । ॐ गं गणपतये॒ नमः ॥७॥

ए॒क॒द॒न्ताय॑ वि॒द्महे॑ वक्रतु॒ण्डाय॑ धीमहि । तन्नो॑ दन्तिः प्रचो॒दया॑त् ॥८॥

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् । अभयं वरदं हस्तैर्बिभ्राणं मूषकध्वजं । रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् । रक्तगन्धानुलिप्ताङ्गं र॒क्तपुष्पैस्सुपूजितम् । भक्तानुकंम्पिनं देवं जगत्कारणमच्युतम् । आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् । एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥९॥

ॐ नमो व्रातपतये । नमो गणपतये । नमः प्रमथपतये । नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्नविनाशिने शिवसुताय श्री वरदमूर्तये॑ नमो॒ नमः ॥१०॥

एतदथर्वशिरो॑यो॑ऽधी॒ते । स ब्रह्मभूया॑य कल्प॒ते । स सर्व॑विघ्नै॑र्न बाध्य॒ते । स सर्वतस्सुख॑मेध॒ते । स पञ्चमहापातको पापा॑त्प्रमुच्य॒ते । सायमधीयानो दिवसकृतं पापं॑ नाशय॒ति । प्रातरधीयानो रात्रिकृतं

पापं॑ नाशय॒ति । सायं प्रातः प्रयुञ्जानोऽपा॑पो भ॒वति । धर्मार्थकाममोक्षं॑ च विन्द॒ति ।

इदमथर्वशीर्षमशिष्या॑य न दे॒यम् । यो यदि मोहा॑द्दास्य॒ति । स पापी॑यान् भ॒वति । सहस्रावर्तनाद्यं

यं का॑मम॒धीते । तं तमने॑न साध॒येत् ॥११॥

अने॑न गणपतिमभि॑षिञ्च॒ति । स वा॑ग्मी भ॒वति । चतुर्थ्यामन॑श्नञ्ज॒पति । स विद्या॑वान्भ॒वति ।

इत्यथर्वणवा॒क्यम् । ब्रह्माद्याचर॑णं वि॒द्यात् । न बिभेति कदा॑चने॒ति ॥१२॥

यो दूर्वाङ्कु॑रैर्यज॒ति । स वैश्रवणोप॑मो भ॒वति । यो लाजै॑र्यज॒ति । स यशो॑वान्भ॒वति । स

मेधा॑वान्भ॒वति । यो मोदकसहस्रे॑णयज॒ति । स वाञ्छितफल॑माप्नो॒ति । यस्सायुज्यसमि॑द्भिर्यज॒ति । स

स॑र्वं लभते स स॑र्वं लभ॒ते ॥१३॥

अष्टौ ब्राह्मणान् सम्यग्ग्रा॑हयि॒त्वा । सूर्यवर्च॑स्वी भ॒वति । सूर्यग्रहे महानद्यां प्रतिमासन्निधौ॑वाज॒स्त्वा ।

सिद्धमन्त्रो भ॒वति । म॒हा॒वि॒घ्नात्प्र॑मुच्य॒ते । म॒हा॒दो॒षात्प्र॑मुच्य॒ते । म॒हा॒पा॒पात्प्र॑मुच्य॒ते । स सर्व विद्भवति

स स॑र्वविद्भ॒वति । य ए॒वं वेदे॑त्युप॒निषत् ॥१४॥

भ॒द्रं कर्णे॑भिः शृणु॒याम॑ देवाः । भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः । स्थि॒रैरङ्गै॑स्तुष्टु॒वाꣳस॑स्त॒नूभिः॑ । व्यशे॑म

दे॒वहि॑त॒ं यदायुः॑ । स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः । स्व॒स्ति नः॑ पू॒षा वि॒श्ववे॑दाः । स्व॒स्ति न॒स्तार्क्ष्यो॒

अरि॑ष्टनेमिः । स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ॥

ॐ शान्ति॒ः शान्ति॒ः शान्तिः॑ ॥